International Journal of Sanskrit Research 2016; 2(1): 62-65

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2016; 2(1): 62-65
© 2016 IJSR
www.sanskritjournal.com
Received: 27-11-2015
Accepted: 29-12-2015

**रमा कुमारी**
शोधार्थी, साहित्य विभाग,
कामेश्वरसिंह–दरभंगा–संस्कृत–विश्व विद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**रमा कुमारी**
शोधार्थी, साहित्य विभाग,
कामेश्वरसिंह–दरभंगा–संस्कृत–विश्व विद्यालय, दरभंगा, बिहार, भारत

# पं० सुरेन्द्र सुमनस्य सामाजिकसेवायां स्थानम्

**रमा कुमारी**

**प्रस्तावना**

''विधिनियमनिर्माणं राज्यसञ्चालने उपयोग्यासी, न तु राज्यस्य कार्यक्षेत्राधीनम् शास्त्रनिरूपितो– पायेष्वेव प्रतयक्षादि प्रमाणत्रयेण फलसाधनत्वस्य निर्णीतत्त्वा दित्यमिप्रायेण समन्वीयते, तर्हि ''व्यवस्थापनं नियमनिर्माणं च सामान्यतो राज्यस्य कार्यक्षेत्रे नान्तर्भूतमिति मूलकृतो वाक्यं राजनीति शास्त्रेणापि समादरणीयं भवति। अत एव ''समादृतशिष्टाचार विरुद्धं यदि शासनेन 'शारदा ऐक्ट सदृशा नियमा निर्मीयन्ते तर्हि तेषां नियमानां पालनं तद्विषये सौष्ठवमभिमन्यमानान् कॉंश्चिद्विद्यान्यत्र साधारण्येन प्रसारणं चातुदुष्करं भवतीत्यपि द्रष्टव्यम्।

प्राचीन भारतराज्येषु जातिनियमानां कार्यान्वय भारो नासीत्। इदं कार्यं तु प्रायो जातीनां पञ्चायतानां वाऽऽसीत्। राज्यव्यवस्था सञ्चालने ब्राह्मण–पुरोहितयोः प्राधान्यमासीदिति'' मूलकृदुक्तयेदं स्पष्टं भवति यत् राज्यव्यवस्थां प्रति ब्राह्मण्यं पौरोहित्यं च प्रयोजकमभूदिति।'' सोऽयं प्रयोज्य प्रयोजक भावोऽलीको वर्तते, तमन्तराऽपि राज्यव्यवस्थायास्संचालयितुं शक्यत्वात् राज्यव्यवस्थां प्रति ब्राह्मणपुरोहितयोरन्यथा सिद्धत्वाच्चेदिदं वचस्तावत्पर्यन्तं सुवयो भवितुमर्हति, यावत्पर्यन्तं भारतीय राजनीतिदृष्ट्या पौरोहित्यं न विमृष्टं स्यात्। कामन्दकीय नीतिसारे पौरोहित्यस्य स्वरूपमेवं वर्णितमस्ति–

''त्रय्यां च दण्डनीत्यां च, कुशलस्स्यात्पुरोहितः।
अथर्वविहितं कुर्यान्नित्यं, शान्तिकपौष्टिकम्।।''

अनेन हि नीतिसार वाक्येन ''राजनीति राज्यव्यवस्थासंचालनम् प्रति कीदृशगुणसम्पन्नं ब्राह्मणं पौराहित्यार्थं युक्तं मनुते'' इति स्फुटी भवति। तेन ''पुरोहितस्य कियदध्ययनमपेक्षितमिति तदालोचकैस्स्वयमेव स्वालोचितं शक्यते। यावत्पर्यन्तं ब्राह्मणः अधीतानां त्रयीदण्डनीत्यथर्ववेदानां पावित्रयं अनवच्छिन्नं स्थापयति ता विद्या आवर्तयन् तिष्ठति तावदेव तस्य भूदेवत्वं स्वीक्रियते अन्यथा तु मनुष्यत्वमेव। तदुक्तं महाभारते– ''स्वाध्याय एव तेषां देवत्वं, क्रोधस्तेषां नृणा मिव'' इति।

एवञ्च भारतीय राजनीतिशास्त्रे पर्यालोचिते ''धर्मप्रधानराज्ये तत्स्वामित्वं धर्मगुरुषु नासीदिति ज्ञायते, राज्ञ एव स्वामित्वेन व्यपदेशात्। अर्थात् धर्मगुरुर्वा भवतु मन्त्री वा भवतु सेनापति र्वा भवतु सर्वेऽप्येतेन स्वामिनोऽपि तु यो मूर्धाभिषिक्तस्सराज्यस्य स्वामी वर्तते तस्य स्वत्वास्पदभूता अन्ये। अत एवप मूर्धामिषिक्तस्य राज्ञस्सप्त प्रकृतिषु पञ्च प्रकृतयः स्वामी मित्रञ्च इति मिलित्वा राज्यं भवति''। तद्यथा–

''स्वाम्यमात्यश्च राष्ट्रं च दुर्गा कोषो बलंसुहृत्।
परस्परोपकारीदं सप्ताङ्गं राज्यमुच्यते।।''

अत्र केचित् ''राजा स्वामी भूत्वाऽपि मन्त्रिणः पराधीनतां स्वीकुर्यात्'' इति राजनीतिविधानं श्रुत्वा जिड्रति तन्न मनोरमम्। ''लज्जावहं कर्म न कर्तव्य मिति तु सत्यम्।

भारतीय राजनीति र्हि लोकस्य पुरतो राजानं तथा स्थापयितुं वाञ्छति यथा स आत्मनि प्रजानुराग निर्माण द्वारा लोकस्य स्थायिविश्वासभाजनतां समर्णयेत्। अतो भारतीय प्राचीन राजनीति ''विनयो जनानुरागस्य प्राणाः तस्या भावेऽविनीतं तं नामुमोदते राजनीतिस्या च विद्या वृद्ध संयोगेनैव नियता''। यथा नीतिसारे–

''सुनिषुणमुपसेव्य सदुरुं शुचिरनुवृत्तिपरो विभूतये।
भवति हि विनयोपसंहितो नृपतिपदाय शमाय चक्षमः।।''

यथा कामोऽतिवृद्धो विनाशहेतुत्वाहरिः, एवं क्रोधादयो पत्यिरिषड्वर्गमभि धतुमाह–कामः कामसूत्रे कृतलक्षणः। स्पर्शविशेष–विषये त्वाश्रियमानिकसुखानुविद्धा फलवत्यर्थप्रतीतिरिति। क्रोधस्तु, अविमृश्यकारितया प्राणिषु द्रोहबुद्धिः। लोभो वितेष्व तिलोलुपता। हर्ष कारणं विना प्राणिहिंसाजनितःा परितोषः। मानो माननीयेष्ववमानबुद्धिः। मदो बलावलोप जनित उत्सेकः। इत्ययं षड्वर्गः। एनं षड्वर्गमुत्सृजेत् अस्मिंस्त्यक्तो सुखी नृपस्तजामितायायायावादिति। तद्यथा–

कामः क्रोध्स्तथा लोभो हर्षो मानो मदस्तथा।
षड्वर्ग भुत्सृजेदेनं तस्मिंस्त्यक्ते सुखी नृपः।।
दाण्डक्यो नृपतिः कामात् क्रोधाच्च जमयेजयः।
लोभादैलस्तु राजर्षि र्वातापिर्हर्ष तोऽसुरः।। [1]

एवञ्च श्री सुरेन्द्र झा सुमन महोदयस्य विविधग्रन्थानामनुशीलनेन प्रतीयते यत् समाजसेवायामपि तस्य स्थानं महत्त्वपूर्णं विद्यते सह समाजस्य सेवा शैक्षणिक रूपेण राजनीतिकरूपेण च प्रामुखेन कृतमिति । तद्यथा– अमोघास्त्र परीक्षणम्, तदर्थ स्थान निर्देशः–

अमोघः क्रियतां राम। अयं तत्र शरोत्तमः।।
तस्य तद्वचनं श्रुत्वा सागरस्य महात्मनः।
मुमोच तं शरं दीप्तं परं सागरदर्शनात्।।

प्रक्षेपण परिणामः– तेन तन्मरुकान्तारं पृथिव्यां किल विश्रुतम्।

निपातितः शरो यत्र वज्राशनिसम प्रभः।।
ननाद च तदा तत्र वसुधा शल्यपीडिता।
तस्माद् व्रणमुखात् तोयमुत्पपात रसातलात्।
अवदारण शब्दश्च दारुणः समपद्यत।।

महास्त्रप्रयोगे नियन्त्रणम्–नाऽयं मया शरः पूर्व रावणस्य वधार्थिना।

मुक्तः शत्रुध्न भूतानां महान् ह्रासो भवेदिति।।

अमोघमहास्त्रादि प्रयोगे मूलनाशो यथा न भवेत्तथा वर्तितव्यम्–

नोत्सृजामि महावेगं शरं शत्रु निर्वहणम्।
मूलघातो न नौ स्याद्धि द्वयोरिति कृतो मया।।

अतो हि यत्र–तत्र यदा–तदा दिव्यास्त्रादि प्रयोक्तारं यज्ञविघ्नदं निरूपयति–

सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा। [2]

शासनानुशासनसमपर्कसूत्रम्–
शासनानुशासन–व्यवस्थापने दिग्–विदिग्वासिनां वैचारिकाणां निरन्तरं सम्पर्क स्थापनमावश्यकमिति ज्ञान–विज्ञान–विचाराचार–प्रचाराय संस्कृतिसभ्यता– परिष्काराय च विद्याव्रतस्नातानां प्रशस्तानां महर्षीणां कुलपतीनां च शासकीय सम्पर्क–प्रसङ्गमुपस्थापयते–

आजग्मुः मुनयः सर्वे राघवं प्रतिनन्दितुम्।।
कौशिकोऽथ यवक्रीतो गार्ग्यो गालव एव च।
कण्वो मेधातिथेः पुत्रः पूर्वस्यां दिशि ये स्थिताः।।
स्वस्त्यात्रेयश्च भगवान् नमुचिः प्रमुचिस्तथा।
अगस्त्योऽत्रिश्च भगवान् सुमुखो विमुखस्तथा।।
आजग्मुस्ते सहागस्त्या ये श्रिता दक्षिणां दिशम्।
नृषङ्गुः कवषो धौम्यः कौशेयश महानृषिः।।
तेर्ऽप्याजग्मुः सशिष्या वै ये श्रिताः पश्चिमां दिशम्।
वसिष्ठः कश्यपोऽथात्रिर्विश्वामित्रः सगौतमः।।
जमदग्निर्भरद्वाजस्तेऽपि सप्तर्षयस्तथा।।
उदीच्यां दिशि सप्तैते नित्यमेव निवासिनः।।
वेदवेदाङ्गविदुषो नानाशास्त्रविशारदाः।

तपोवनादिधर्मस्थान–विद्यास्थानेषु सैन्यादिप्रवेशो निषिध्यते–

किमर्थ चापि निक्षिप्य दूरे बलमिहागतः।
कस्मान्नेहोपयातोऽसि सबलः पुरुषर्षभ।।
भरतः प्रत्यवाचेदं प्राञ्जलिस्तं तपोधनम्।
न सैन्येनोपयातोऽस्मि भगवन् भगवद्भयात्।।
राज्ञा हि भगवन्नित्यं राजपुत्रेण वा तथा।
यत्नतः परिहर्तव्या विषयेषु तपस्विन।।
ते वृक्षानुदकं भूमिमाश्रमेषूटजां तथा।
न हिस्युरिति तेनाहमेकएवागतस्ततः।।

अनुमतैस्तैः प्रवेष्टव्यम्–

आनीयतामितः सेनेत्याज्ञप्तः परमर्षिणा।
तथाऽनुचक्रे भरतः सेनायाः समुपागमम्।।
स प्रविश्यं महातमानेमृषिं शिष्यगणेर्वृतम्।
रामः सौमित्रिणा सार्धं सीताया चाभ्यनन्दयत्।।

शिक्षासंस्कार प्रवर्तनाय स्थापिता आश्रमाः–

आश्रमो नाति दूरस्थो महर्षेर्भावितात्मनः।।
प्राज्यधूमाकुलवनश्चीरमाला परिष्कृतः।
प्रशान्तमृगयूथश्च नानाशकुनिनादितः।।
नात्र जीवेन्मृषावादी क्रूरो वा यदि वा शठः।
नृशंसः पापवृत्तो वा मुनिरेष तथा विधः।।
अत्र देवाश्च यक्षाश्च नागाश्च पतगैः सह।
वर्स्त्रन्त नियताहारा धर्ममाराधयिष्णवः।।

शिक्षादाने गुरु–शिष्य सन्तुष्टिः –

शिष्यस्तु तस्य ब्रुवतो मुनेर्वाक्यमनुत्तमम्।
प्रतिजग्राह सन्तुष्टस्तस्य तुष्टोऽभवन् मुनिः।।
भरद्वाजस्ततः शिष्यो विनीतः श्रुतवान् गुरोः।

आचार नियमाः –

जहौ निद्रां च तन्द्रां च प्रसक्तं च परिश्रम्।
संग्रहेणाकरोत् सर्वान् मन्त्रान् संत्रावसानिकान्।।

शिष्टाचार प्रकरणम्–अभिवादन–प्रकाराः–तत्र प्रणाम विधिः–

नाम संभावयन् रामो ववन्दे चरणौ पितुः।
अभ्यवादयदव्यग्रा स्वं नाम समुदाहरत्।

आशीर्विधिः–

सपुत्रमूर्ध्न्युपाघ्राय राजा दशरथस्तदा।
समात्रा समभिप्रेत्य परिष्वज्याभिनन्दितम्।
प्राप्नुह्यायुश्च कीर्ति च धर्मं च स्वकुलोचितम्।
तां च मूर्ध्न्युपाघ्राय परिष्वज्य च कैकयी।

वर्णानुरूपा आशिषः –

ब्राह्मणो वाऽपि भद्रं ते क्षत्रियो वाऽसि दुर्जयः।
वैश्यस्तृतीयो वर्णो वा शूद्रो वा सत्यवाग् भव।।
'गृह्यतां पाणिना पाणिः।'
तावन्यान्योऽञ्जलि कृत्वा स्नेहात् संश्लिष्य चोरसा।

आगमनानन्तरं हर्षाभिव्यक्तिः–

अद्यप्राप्ता तपः सिद्धिस्तव सन्दर्शनान् मया।
अद्य मे सफलं जन्म गुरवश्च सुपूजिताः।।
अद्य मे सफलं तत्पम् .........।

गमनोपक्रमे शुभाशंसनम्–

स्वस्ति प्राप्नुहि भद्रं ते गच्छ सौम्यं यथासुखम्।
गच्छ सौम्य शिवं मार्गं कार्यस्यास्य विवर्धये।
गम्यतामर्थ सिद्धये।
स्वस्ति प्राप्नुहि भद्रं ते साधयाम नरर्षभ।

कुशल जिज्ञासा यथा–

कच्चित्ते निर्जिता विघ्नाः कच्चित्ते वर्धते तपः।
कच्चित्ते नियतः कोप आहारश्च तपोधने।।
कच्चित्ते नियमाः प्राप्ताः कच्चित्ते मनसः सुखम्।
कच्चित्ते गुरुशुश्रूषा सफला चारुभाषिणि।।

स्वागतपूर्वकं प्रयोजनं पृच्छेत्–

यथाऽमृतस्य सम्प्राप्तिर्यथा वर्षमनूदके।।
प्रणष्टस्य यथालाभो यथा हर्षो महोदयः।।
तथैवागमनं मन्ये स्वागतं ते महामुने।
क्व च ते परमं कामं करोमि किमु हर्षितः।।

प्रस्थानकाले वाक्प्रयोगः–

श्रेयसे वृद्धये तात पुनरागमनाय च।
गच्छत्वरिष्टमव्यग्रः पन्थानमकुतो भयम्।।

अनुगमन नियमः–

यमिच्छेत् पुनरायान्तं नैव दूरमनुव्रजेत्।

ज्येष्ठ–कनिष्ठव्याहार व्यवहारः–

एष लोके सतां धर्मोयज्ज्येष्ठवशगो भवेत्।
उत्तरं नहि वक्तव्यं ज्येष्ठेनाऽभिहिते पुनः।
प्रतिवक्तुं प्रकृष्टे हि नावकृष्टस्तु शक्नुयात्।
प्रेष्ये मयि स्थिते राजन् न भूयः क्लेशमाप्नुयात्।
तदा ज्ञापय कः किं ते कुतो वापि व्यवस्यतु।

आसनग्रहणक्रमः–

ब्रह्मणा समनुज्ञातः सोप्युपाविशदासने।

वाक्यान्तरे वक्तव्य निरोधः–

उत्तरं च न वक्तव्यं शूर वाक्यान्तरे मम।

श्रेष्ठस्यादेशं पालनम्–

गुरुश्च राजा च पिता च वृद्धः क्रोधात्प्रकर्षाद्यदि वापि कामात्।
यद् व्यादिशेत् कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः।।

समाजे ग्राह्य–त्याज्य विषयाः–

न तत्समाचरेद् धीरो यत्परोऽस्य विगर्हयेत्।

परदाराभिमर्शनं त्याज्यम्–

निवर्तय गति नीचां परदारभिमर्शनम्।
यथात्मनस्तथाऽन्येषां दारा रक्ष्या विमर्शनात्।।

राजद्रोहो विप्रतिषिद्धः–

राज्ञो विप्रतिकूलस्थो न जातु सुखमेधते।।[3]

आजीविका वृत्तयः जीविकार्थं पारम्परिक वंशानुगत वृत्तिग्रहणं सुकरं भवतीत्याह–

या वृत्तिं वर्तते तातो यां च नः प्रपितामहः।
तां वृत्ति वर्तसे कच्दिद् या च सत्पथगा शुभा।।

पुरोहितः–पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत्।

नापितः–

ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धनाः।
सुखहस्ताः सुशीघ्राश्च राघवं प्रत्यपद्यत।।
विशोधित जटः स्नातश्चित्रमाल्यानुलेपनः।

मङ्गलव्यवहारिणः–

स पुरोगामिभिस्तूर्यैस्तालस्वस्तिक पाणिभिः।
प्रत्याहरदि्भर्मुदितैर्मङ्गलानि वृतो ययौ।।

रूढ़ो लोकविश्वासः–

निमित्तं लक्षणं स्वप्नं शकुनिस्वरदर्शनम्।
अवश्यं सुखदुःखेषु नराणां परिश्यते।।
शयानः पुरुषो राम तस्य शैलस्य मूर्धनि।
यत् स्वप्ने लभते वित्तं तत् प्रबुद्धो{धिगच्छति।।
तदिदं काकतालीयं घोरमासादित मया।

कर्तव्यता–

पाणिप्रदानकाले च यत्पुरा त्वग्निसन्निधौ।
अनुशिष्टं जनन्या मे वाक्यं तदपि मे श्रुतम्।।
न विस्मृतं तु मे सर्व वाक्यैः स्वैर्धर्मचारिणि।
पतिश्रुश्रृषणान्नार्यास्पतो नाऽन्यद् विधीयते।।
स्त्री शिक्षा–तस्याऽहं कुर्वतो नित्यं वेदाभ्यासं महात्मनः।
सम्भृता वाङ्मयी कन्या नाम्ना वेदवती स्मृता।।

स्वभाव प्रसङ्गे–

वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि।
स्वभावसत्वेष नारीणामेषु लोकेषु दृश्यते।।
एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन।
समस्थमनुरज्यन्ते विषमस्थं त्यजन्त्यपि।।
शतहृदानां लोलत्वं शास्त्राणां तीक्ष्णतां तथा।
गरुडानिलयोः शैध्र्यमनुगच्छन्ति योषितः।
इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता।
श्लाघ्या च व्यपदेश्या च यथा देवीष्वरुन्धती।।

स्त्री संरक्षणे अधिकृताः–

गतिरेषा पतिर्नार्या द्वितीयागतिरात्मजः।
तृतीया ज्ञातयो राजन् चतुर्थी नैव विद्यते।।[4]

एवञ्च पं. सुरेन्द्र झा सुमन सामाजिकसेवायामपि समाजस्य विविधक्षेत्रे विविधस्तरे च स्वकीयबौद्धिकपराक्रमेण परिश्रमेण च सेवा कृतः। समाजस्य सेवाऽपि तस्य जीवनस्य परमं लक्ष्यमासीत्।

**संदर्भ**

1. कामन्दकीय नीतिसारः, पृष्ठम्–36–37।
2. प्राचेतस राजशास्त्राम्, पृ. सं.– 136।
3. प्राचेतस राजशास्त्राम्, पृ. सं.– 165–171।
4. प्राचेतस राजशास्त्राम्, पृ. सं.– 192–196।